श्रीमते रामानुजाय नमः

# ॥ चतु:श्लोकी ॥

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ।
स्तोत्रयामास योगीन्द्रः तं वन्दे यामुनाह्वयम् ॥

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

नमो नमो यामुनाय नमो यामुनाय नमो नमः ।
नमो नमो यामुनाय नमो यामुनाय नमो नमः ॥

कान्तस्ते पुरुषोत्तमः फणिपतिः शय्याऽऽसनं वाहनं
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।
ब्रह्मेशादि सुरव्रजः सदयितः त्वद्दासदासीगणः
श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ॥ 1

यस्यास्ते महिमानं आत्मन इव त्वद्वल्लभोऽपि प्रभुः
नालं मातुं इयत्तया निरवधिं नित्यानुकूलं स्वतः ।
तां त्वां दास इति प्रपन्न इति च स्तोष्यामि अहं निर्भयः
लोकैकेश्वरि! लोकनाथदयिते! दान्ते! दयां ते विदन् ॥ 2

ईषत् त्वत् करुणा निरीक्षण सुधा सन्धुक्षणात् रक्ष्यते
नष्टं प्राक् तदलाभतः त्रिभुवनं सम्प्रति अनन्तोदयम् ।
श्रेयो न ह्यरविन्दलोचन मनः कान्ता प्रसादादृते
संसृति अक्षर वैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ 3

शान्तानन्द महाविभूति परमं यत् ब्रह्म रूपं हरेः
मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् ।
यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि तान्–
याहुः स्वैरानुरूपरूप विभवैः गाढोपगूढानि ते ॥ 4

**॥ इति चतुःश्लोकी संपूर्णम् ॥**